# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College affiliated to University of Calcutta)

**B.A./B.Sc. FIFTH SEMESTER EXAMINATION, DECEMBER 2016**
**THIRD YEAR [BATCH 2014-17]**

Date : 13/12/2016 **SANSKRIT [Honours]**
Time : 11 am – 3 pm **Paper :** V Full Marks : 100

**[Use a separate Answer Book for each Group]**

## Group – A [54 Marks]

1. **अन्यतरस्य** मन्त्र**द्वयस्य** वङ्गानुवादः कार्यः। [2×5]

क) अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत।
स देवाँ एह वक्षति।।

ख) अहं रुद्राय धनुरा तनोमि
ब्रह्मद्विषे शरवे हन्तवा उ।
अहं जनाय समदं कृणो-
म्यहं द्यावापृथिवी आ विवेश।।

ग) समानी व आकूतिः
समाना हृदयानि वः।
समानमस्तु वो मनो
यथा वः सुसहासति।।

घ) द्वेष्टि श्वश्रूरप जाया रुणद्धि
न नाथितो विन्दते मर्डितारम्।
अश्वस्येव जरती वस्न्यस्य
नाहं विन्दामि कितवस्य भोगम्।।

2. **एकस्य** प्रश्नस्तोत्तरं लेख्यम्। [1×10]

क) का नाम दशतयी ? तत्रादिमसूक्तस्य कस्तावदृषिः ? किं छन्दः ? तत्र स्तूयमानाया देवतायाश्चारित्रिकवैशिष्ट्यं समासेनोपस्थापनीयम्। [1+1+1+7]

ख) हिरण्यगर्भसूक्तस्य दार्शनिकं तत्त्वं समासेन उपस्थाप्यताम्।

3. ऋषिच्छन्दोदैवतनिर्देशपुरःसरं व्याख्यायता**मेको** मन्त्रः। [1×6]

क) उप त्वाग्ने दिवेदिवे
दोषावस्तर्धिया वयम्।
नमो भरन्त एमसि।।

ख) अहं सुवे पितरमस्य मूर्ध-
न्मम योनिरप्स्वन्तः समुद्रे।
ततो वि तिष्ठे भुवनानु विश्वो-
तामुं द्यां वर्ष्मणोप स्पृशामि।।

4. **एकस्य** प्रश्नस्योत्तरं लेख्यम्। [1×4]

क) वैयाकरणटिप्पणी**द्वयं** लेख्यम्। [2×2]
हन्तवा उ, अप जाया रुणद्धि, दोषावस्तः, ईळे

ख) याज्ञिकदिशा टीका**द्वयं** विरचनीयम्। [2×2]
याज्या, आग्नेयक्रतुः, आधानम्, विशेषविनियोगः।

गः) **एकस्य** कस्यचित् सन्दर्भस्याशयः स्फुटीक्रियताम्। [1×4]

i) अग्नीषोमप्रणयने 'उप त्वाग्ने' इत्यादिकोऽनुवचनीयस्तृचः।

ii) अभिप्लवषडहस्य मध्यवर्तिषूक्थ्येषु तृतीयसवने मैत्रावरुणस्य 'अग्ने यं यज्ञम्' —इत्यादिको वैकल्पिकोऽनुरूपस्तृचः।

5. 1(क) इत्यस्य 3(क) इत्यस्य **वा** पदपाठः प्रदेयः। [5]

6. कस्यचि**देकस्य** प्रश्नस्योत्तरं लेख्यम्। [10]

क) वैदिकव्याकरणानुसारम् उपसर्गाणां वैचित्र्यं स्फुटीक्रियताम्। लौकिकतस्तस्य कीदृशो भेदः? [7+3]

ख) छन्दसि तुमर्थे केषां प्रत्ययानां कथंकारं प्रयोगो भवतीति सोदाहरणं समुपस्थाप्यताम्।

ग) विषयद्वयमवलम्ब्य टीका**द्वयं** लेख्यम्। [2×5]

i) वैदिकवाङ्मये लुङ्लकारः ii) वैदिकसन्धिः iii) इतिकरणम् iv) छन्दसि सुबन्तवैचित्र्यम्।

7. अधोलिखितवैदिकपदानां **पञ्चानां** लोकिकपर्यायाः प्रदेया देवनागरलिप्या एव। [5×1]

देवेभिः, वक्षति, इमसि, कृणोमि, मूर्धन्, दाधार, महित्वा, उभा, दृष्टाय, अश्नवत्।

## Group – B

[46 Marks]

8. कस्यचि**देकस्य** प्रश्नस्योत्तरं लेख्यम्। [1×10]

क) व्यसनशब्दस्य का व्युत्पत्तिः? मनुमुनिमतानुसारं कति तावद् व्यसनानि? तानि कथं नृपेण परिहरणीयानि इति वैशद्येन लेख्यम्। [1+2+7]

ख) दूते मनुमुनिमतमनतिविस्तरेणोपस्थापनीयम्।

9. पद्य**मेकं** व्याख्यायताम्। [1×7]

क) यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः।
शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः।।

ख) अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्वस्य राजानमसृजत् प्रभुः।।

10. **अन्यतरस्य** पद्यस्य वङ्गानुवादः कार्यः। [1×5]

क) तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम्।।

ख) अपि यत् सुकरं कर्म तदप्येकेन दुष्करम्।
विशेषतोऽसहायेन किमु राज्यं महोदयम्।।

11. विषयमेकमवलम्ब्य टी**कैका** रचनीया : ब्राह्मणब्रुवः, जाङ्गलदेशः। [1×3]

12. **एकः** प्रश्नः समाधेयः। [1×12]

क) अमात्योत्पत्तिविषये कौटिल्यमतजातं विस्तरेणोपन्यसनीयम्।

ख) 'चतस्र एव विद्या इति कौटिल्यः' इति मतम् अर्थशास्त्रकारशैल्या स्थापनीयम्। त्रयीतरविद्यानां स्वरूपं चोपन्यसनीयम्। [3+9]

13. कस्यचि**देक**स्यानुच्छेदस्य वङ्गानुवादः कार्यः। [1×7]

क) तस्मादरिषड्वर्गत्यागेनेन्द्रियजयं कुर्वीत। वृद्धसंयोगेन प्रज्ञां, चारेण चक्षुः, उत्थानेन योगक्षेमसाधनं, कार्यानुशासनेन स्वधर्मस्थापनं, विनयं विद्योपदेशेन, लोकप्रियत्वमर्थसंयोगेन, हितेन वृत्तिम्।

ख) पितृपैतामहानमात्यान् कुर्वीत दृष्टापदानत्वात्। ते ह्येनमपचरन्तमपि न त्यजन्ति सगन्धत्वात्। अमानुषेष्वपि चैतद् दृश्यते — गावो ह्यसगन्धगोगणम् अतिक्रम्य सगन्धेष्वेवावतिष्ठन्त इति।

14. विषयद्वयमवलम्ब्य संक्षिप्तटीका**द्वयं** विरचनीयम्। [2×3]

त्रयी, कौटिल्यः, परिमितार्थदूतः, गणपतिशास्त्री।

———— × ————